Postal Regd.No. GAMC- 1553/2019-2021
ISSN 2454-6313

# संस्कृत - साम्प्रतम्

(Sampratam means "Current")
(संस्कृतमासिकीपत्रिका)
वर्ष : १४ अङ्क : १६१
ऑक्टोबर - २०१९

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### भग्नहृदयानां स्मारकम्

'आन्दामान' शब्दस्य श्रवणमात्रेण तत्रत्यं घोरं कारागृहं स्मृतिपथम् आयाति। तस्य विषमा दण्डनीतिः स्वभावशुष्कं जनम् अपि आर्द्रयितुं शक्नोति । यत्र वीरसावरकरः बन्दी अभवत् तत् कारागृहं प्रविष्टः हतभाग्यः मनुष्यः पुनः स्वगृहदर्शनाभिलाषं मूलात् त्यजति। यतो हि प्रोन्नताः भित्तयः, लौहमयाः दृष्टिपाताः, करालानि तालयन्त्राणि च पलायनस्य स्वप्नं द्रष्टुम् अपि अवसरं न ददति। कदाचित् कथञ्चित् पलायमानोऽपि बन्दीजनः निबिडे वने हिंस्रपशूनां ग्रासः भवेत् अथवा प्रतिदिशं गर्जन्तं सागरम् अवलोक्य मृत्योः प्रतीक्षां कुर्यात्।

एतादृशे तमोलिप्ते जीवने अपि आशादीपाः कथं ज्वलन्ति इति जानीमः। अस्मिन् कारागृहे गलितद्रोहाः उत्तमाः बन्दीजनाः 'मोडेल प्रिझनर्स' गण्यन्ते । तेषु विनम्राः जनाः काष्ठकर्तन-नारीकेलपातनपूगीफलचयनादीनि कर्माणि सम्पादयितुं वने प्रेष्यन्ते। अत्र पशुभये सत्यपि ते प्रकाशमानं बाह्यं जीवनं रोचयन्ति। ततः महता श्रमेण प्राप्तं स्वल्पम् अपि धनं तेभ्यः बहु रोचते। तत् धनं पत्रालये निक्षेप्तुम् तन्त्रेण व्यवस्था क्रियते। पत्रालयात् प्राप्ता न्यासपर्णिका (पासबुक) तेषां जीवनसूत्रम् इव महत्त्वं वहति। यतो हि न्यासपर्णिकायाः आधारेण कदाचित् मुक्तिः भविष्यति इति कल्पना निर्वाणप्राये आशादीपे पुनः तैलं सिञ्चति।

कारागृहे प्रतिवर्षं द्विवारं विलक्षणा घटना जायते। तस्याः नाम अस्ति-स्वयंवरः ! न्यासपर्णिकावन्तः बन्दीजनाः अस्मिन् स्वयंवरे भागं वोढुं शक्नुवन्ति। कारागृहस्य प्रकोष्ठानां पुरतः बन्दीपुरुषाः सविनयं पादसञ्चलनं कुर्वन्ति। नातिदूरे स्थित्वा तत् अवलोकयन्त्यः बन्दीस्त्रियः मनोगतस्य पुरुषस्य वरणं कुर्वन्ति। ताः ईप्सितं पुरुषं कारागृहस्य अधिकारिभ्यः निवेदयन्ति। येषां भाग्यवतां वरणं भवति ते कारागृहात् दूरे वसन्ति। इतरे कारागृहस्य अन्धतमसे पतित्वा पुनः स्वयंवरं प्रतीक्षन्ते।

नवयुगलानां वसतेः अपि प्रेमनगरम् इति श्रवणप्रियं नाम सुखस्य सम्भावनां दृढीकरोति । अधिकारिणः विवाहोत्सुकानां पुरुषाणां षण्मासान् निरीक्षणं कुर्वन्ति। तत्पूर्वं दर्शनसुखम् अनुभवितुं प्राप्ता पत्नी अतुष्टा भवति चेत् पुरुषः पुनः कारागृहस्य अन्धप्रकोष्ठं प्रवेष्टुम् अर्हति। प्रेमनगरे षण्मासान् सर्वं सुष्ठु प्रवर्तते चेत् ते पाणिग्रहणं कर्तुं शक्नुवन्ति। विवाहात् अनन्तरं तेषां वासः परिवर्तते। यतो हि स्वयंवरसमुद्रं तीर्त्वा आगताः नूतनाः बन्दीजनाः तत्र वस्तुं शक्नुयुः।

अथ कारागृहात् बहिः मुक्तं प्रणयसुखं स्वादयन्तः ते शेषम् आयुष्यं क्षपयन्ति। तेषां वसतेः माङ्गलिकं नाम अस्ति - विवाहनगरम्। अद्यापि प्रवासिनः विवाहनगरम् अवलोक्य रोमाञ्चम् अनुभवन्ति। यद्यपि सम्प्रति शासनिकाः कर्मचारिणः अत्र वसन्ति, तथापि भग्नहृदयानां स्मारकम् इव एतत् स्थानं बुधजनान् 'तमसो मा ज्योतिर्गमय' इति प्रार्थयितुं क्षणं प्रेरयति।

# धर्माचरणम्



प्राचीने काले ब्रह्मदत्तः काशीराज्यं परिपालयति स्म। तस्मिन् एव काले बोधिसत्त्वः धनञ्जयनाम्ना इन्द्रप्रस्थे जन्म प्राप्तवान् आसीत्। तस्य शासनकाले वृष्ट्यादयः समये भवन्ति स्म। क्षामादीनां वार्ता अपि न आसीत्। जनाः सुखेन जीवन्ति स्म।

तेषु एव दिनेषु दन्तपुरं राजधानीं परिकल्प्य कालिङ्गः नाम राजा कलिङ्गदेशं पालयति स्म। तस्य देशे सर्वदा क्षामः भवति स्म। जनाः बुभुक्षया प्राणैः वियुक्ताः भवन्ति स्म। राज्ये सर्वत्र हाहाकारः श्रूयते स्म।

देशस्य दुरवस्थां दृष्ट्वा राजा नितरां खिन्नः। सः कदाचित् मन्त्रिणः मेलयित्वा अपृच्छत्– ''एतस्मिन् वर्षे अस्माकं देशे महान् क्षामः दृश्यते। एतस्य किं कारणम् ? एतस्य निवारणाय कः उपायः ?'' इति। तदा मन्त्रिणः अवदन् – ''महाराज! देशे यदा धर्मस्य क्षयः भवति तदा विविधाः उत्पाताः सम्भवन्ति। इन्द्रप्रस्थस्य राजा धर्मेण राज्यं पालयति। अतः तस्य देशे सुवृष्टिः सुभिक्षः च सदा भवति। तत्र क्षामस्य वार्ता अपि नास्ति। जनाः तत्र सुखेन सन्ति'' इति।

''तर्हि भवन्तः एकं कार्यं कुर्वन्तु। अद्यैव इन्द्रप्रस्थं गत्वा धनञ्जयस्य दर्शनं कुर्वन्तु। सुवर्णपत्रेषु धर्मसूत्राणि लेखयित्वा आनयन्तु। वयम् अपि तानि व्यवहारपथम् आनीय देशं सुसमृद्धं करवाम'' इति अवदत् राजा।

तस्मिन् एव दिने कलिङ्गदेशस्य मन्त्रिणः सुवर्णपत्राणि स्वीकृत्य इन्द्रप्रस्थं गतवन्तः। राजानं धनञ्जयं दृष्ट्वा ते अवदन् – ''महाराज! वयं कलिङ्गदेशीयाः। अस्माकं देशः घोरेण क्षामेण ग्रस्तः अस्ति। भवान् तु मूर्तिमान् धर्मः एव। धर्मेण एव प्रजाः पाल्यन्ते भवता। अतः एव अत्र जनाः सुखेन निवसन्ति। अस्माकं राज्ञा ये धर्मनियमाः अनुसरणीयाः सन्ति तान् सुवर्णपत्रे लिखित्वा ददातु कृपया। तेषाम् अनुसरणेन अस्माकं राजा प्रजाः क्षाममुक्ताः करिष्यति'' इति। एतावत् उक्त्वा ते सुवर्णपत्राणि राज्ञः पुरतः अस्थापयन्।

तदा धनञ्जयः तान् प्रणम्य अवदत् – ''मन्त्रिवर्याः! अहं क्षन्तव्यः। एतेषु पत्रेषु धर्मनियमानां लेखने अर्हता नास्ति मम। यतः मया पूर्वं कदाचित् धर्मनियमस्य उल्लङ्घनं कृतम् आसीत्। अस्माकं देशे त्रिषु वर्षेषु एकवारं कार्तिकोत्सवः आचर्यते। तदवसरे कासारतीरे यज्ञं कृत्वा चतसृषु दिक्षु चत्वारः बाणाः प्रयोक्तव्याः राज्ञा। मया तिसृषु दिक्षु सम्यक् एव बाणाः प्रयुक्ताः। किन्तु एकः बाणः जले पतितः। तस्य आघाततः मत्स्याः मण्डूकाः च केचन मृताः। एवं मया अधर्मः आचरितः तदा। यदि मम देशे अत्याचारः अन्याय्यम् इत्यादयः न स्युः तर्हि तस्य कारणं पूर्वजैः कृतं पुण्यम् एव। अतः मम पूर्वजेषु सः पुण्यात्मा कः आसीत् इति ज्ञातुं प्रयासं कुर्वन्तु'' इति।

एतत् श्रुत्वा कलिङ्गमन्त्रिणः नितराम् आश्चर्यचकिताः। ते ततः निर्गत्य राजमातरं मायादेवीं दृष्टवन्तः। सर्वं ताम् उक्त्वा निवेदितवन्तः ते – ''अम्ब! कृपया भवती धर्मसूत्राणि लिखित्वा ददातु'' इति।

''वत्साः । मया अपि धर्मनियमस्य अतिक्रमणं कृतम् एव । कदाचित् मम ज्येष्ठः पुत्रः मह्यं सुवर्णहारम् उपायनी कृतवान् । ज्येष्ठा स्नुषा आभरणसम्पन्ना इति विचिन्त्य मया स च सुवर्णहारः कनिष्ठस्नुषायै दत्तः । किन्तु अनन्तरक्षणे मम पक्षपातव्यवहारविषये मया खेदः अनुभूतः । अतः धर्मसूत्राणां लेखने नास्ति मम योग्यता'' इति अवदत् राजमाता।

एतदनन्तरं कलिङ्गदेशस्य मन्त्रिणः राज्ञः अनुजं नन्दं दृष्टवन्तः । सः अपि – 'मया अपि धर्मनियमस्य अतिक्रमणं कृतम् एव' इति वदन् काञ्चित् घटनां श्रावितवान् – ''अहं प्रतिदिनं सायम् अन्तःपुरं गच्छामि । कदाचित् रात्रौ तत्रैव वसामि अपि । यदि अहं रथे कशां परित्यज्य गच्छामि तर्हि तस्य अर्थः – अहं रात्रौ राजप्रासादे न वसामि इति । अतः तादृशे अवसरे सारथिः रथे उपविश्य मां प्रतीक्षते । यदि अहम् आत्मना सह कशाम् अपि नयामि तर्हि रात्रौ मया राजप्रासादे एव वासः क्रियते इत्यर्थः । तदा सारथिः रथं प्रतिनयति, अनन्तरदिने प्रातः रथम् आनयति च । कदाचित् मया रथे कशां परित्यज्य राजभवनं प्रविष्टम् । रात्रौ प्रतिगन्तव्यम् इत्येव मम चिन्तनम् आसीत् । किन्तु अष्टवादनसमये महती वृष्टिः आरब्धा । तत्रैव वासः करणीयः इति राज्ञा बहुधा अनुरोधः कृतः । अतः मया तस्यां रात्रौ राजभवने एव शयनं कृतम् । मां प्रतीक्षमाणः सारथिः वृष्टौ शैत्ये च रथे एव उपविष्टवान् आसीत् । एवं तं कष्टे पातयता मया धर्मविरोधः आचरितः'' इति।

''एतद्देशीयः राजपुरोहितः वा धर्मम् अनूचानतया पालितवान् स्यात्'' इति चिन्तयन्तः मन्त्रिणः तस्य समीपं गतवन्तः।

सः अपि धर्मातिक्रमणस्य विषयं वदन् एकं प्रसङ्गम् अश्रावयत् – ''कदाचित् राजभवनं गच्छता मया राजमार्गे कश्चन रथः दृष्टः । सः सुवर्णपटलेन आवृतः आसीत् । तस्य दर्शनात् मम मनसि भावना उत्पन्ना यत् यदि राजा एतं मह्यं दद्यात् तर्हि अहो ! महान् आन्दः स्यात् इति । राजा मया यदा दृष्टः तदा सः अवदत् – 'एतं रथम् अहं भवते यच्छामि । कृपया स्वीक्रियताम्' इति । रथप्राप्तीच्छानिमित्तं पश्चात्तापम् अनुभवन् अहं तस्य स्वीकारं निराकृतवान् । अतः अहं धर्मसूत्राणि लेखितुम् अनर्हः'' इति।

कार्यसाधनार्थं किं करणीयम् इति कलिङ्गमन्त्रिभिः न ज्ञातम् । ते इन्द्रप्रस्थस्य महामन्त्रिणः समीपं गतवन्तः । महामन्त्री अपि एतद्विषये स्वस्य असाहायकतां दर्शयन् अवदत् – ''कदाचित् मया कस्यचित् कृषिकस्य क्षेत्रस्य मापनाय गतम् आसीत् । मापनानन्तरं मया स्तम्भः निखातव्यः आसीत् । किन्तु यत्र स्तम्भस्य निखननं करणीयं तत्र किञ्चन बिलं दृष्टम् । तद्विरुद्धदिशि निखननं क्रियेत चेत् राज्ञः हानिः । अतः मया आज्ञा कृता यत् बिलस्थले एव निखननं भवतु इति । सेवकेन तथैव कृतम् । तस्मात् आघातं प्राप्य कश्चन वृश्चिकः मृतः अतः मया अपि धर्मस्य अनुपालने प्रमादः कृतः एव । अहं कथं वा धर्मसूत्राणां लेखने अधिकारी भवेयम् ?'' इति।

सर्वस्य श्रवणस्य अनन्तरं कलिङ्गमन्त्रिणां मनसि कश्चन विचारः आगतः । ते आत्मना श्रुताः कथाः एव स्वर्णपत्रेषु लिखितवन्तः तानि पत्राणि राज्ञे दत्तवन्तः ते । कलिङ्गराजः अवगतवान् यत् निष्कपटव्यवहारः एव धर्मसारः इति । अतः सः धर्मविषये निष्कपटव्यवहारं कुर्वन् शासनम् आरब्धवान् । तस्मात् अचिरात् एव कलिङ्गदेशे वृष्टिः जाता । जनाश्च सुखेन जीवनम् आरब्धवन्तः ।

**– जातककथा**

## वैश्विकपर्यावरणादिसमस्यानां परिहाराय वैदिकयज्ञपरम्परायाः आवश्यकता

भाविन पाठकः

( अनुवर्तते... )

**संस्कृतसाहित्ये पर्यावरणस्य सन्दर्भाः**

चराचरजगत् पर्यावरणं सृष्टेः अङ्गभूततत्वानि । तेषाम् एकाङ्गीभावसम्बन्धेन कालक्रमः प्रचलदस्ति । वस्तुतः सृष्टेः उत्पत्तिः जगतः विकासः च पर्यावरणप्रादुर्भावः अस्ति।

- ऋग्वेदे हिरण्यगर्भः समवर्तताग्रे इत्यत्र सृष्टेः विकासक्रमः वर्णितः अस्ति। प्रथमं सर्वेषां जीवानां स्वामिभूतः हिरण्यगर्भः अस्तित्ववान् अभवत्। ततः एव सृष्टेः अविच्छिन्नः विकासः आरब्धः।
- विज्ञानमतानुसारं प्रकृतिः सदैव रूपत्रये विद्यमाना भवति । कणं प्रतिकणं विकिरणञ्च । वैदिकसिद्धान्तानुसारमपि प्रकृतिः वर्गत्रये विभक्ता अस्ति। "त्रयः कृण्वति भुवनस्य रेत" इति ऋग्यवेदः (७/३३/७)। अर्यमावरुणमित्राणां संयुक्तसत्ता एव अदितिः या अनादि-अखण्डसत्तास्ति।
- वैदिकसाहित्ये प्राकृतिकपदार्थैः कल्याणस्य कामना स्वस्तिरूपेण उक्ता। तदनुगुणं अप्राप्यवस्तुनः प्राप्तिः योगः अस्ति। तस्य संरक्षणञ्च क्षेमः अस्ति। (ऋग्वेदः ५/५१/११, ५/५१/१३, ५/५१/१४, १०/७/७१)
- शं नः सूर्य उरुचक्षा उदेतु शं नक्षतस्रः प्रदिशो भवन्तु। शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥ ७/३५/८ ॥ नदीसमुद्रजलं सुखप्रदं भवेत् इति ऋग्वेदः।
- शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम्। शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ॥ ७/३५/४ ॥ ज्योतिर्मयः अग्निः अस्मभ्यं सुखप्रदं भवेत्। इति ऋग्वेदः।

**पर्यावरणसंरक्षणे यज्ञप्रयोगस्य महत्त्वम्।**

पर्यावरणसंरक्षणे यज्ञस्य महत्त्वपूर्णं स्थानमस्ति । भारतीयपरम्परानुसारं सृष्टौ आदानप्रदानक्रमे यज्ञकार्यम् आवश्यकमस्ति यतो हि यज्ञकर्मणा प्राकृतिकसन्तुलनं रक्षितुं शक्यते । यजुर्वेदे यज्ञः सृष्टिचक्रस्य केन्द्रं कथितः । प्रकृतिचक्रानुसारं प्रत्येकं पदार्थः स्वमूलस्थानं प्राप्नोति। एतेनैव वर्षा-ऋतुपरिवर्तनादि प्राकृतिक्यः क्रियाः सम्भाव्यन्ते । ऋग्वेदे यजुर्वेदे च एतस्मिन् सन्दर्भाः प्राप्यन्ते तदनुगुणं वर्षाचक्ररूपियज्ञे वसन्तऋतुः घृतमस्ति, ग्रीष्मर्तुः समिधा शरद् च हव्यमस्ति।

**यत् पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद् हविः ॥**

ऋक्० १०/९०/०६, यजु० ३१/१४

यज्ञः सृष्टिकेन्द्रमस्ति इति तै०ब्रा० ३/९/५/५ । यज्ञः प्रदूषणम् अपाकरोति इति ऐ०ब्रा० ५/३/३ । गीतायाम् अपि उल्लिखितमस्ति यत् यज्ञद्वारा देवाः प्रसन्नाः भवन्ति ते च देवाः वर्षया जनान् सन्तोषयन्ति । एवं परस्परं भावयन्तः श्रीवृद्धिः भवति।

**देवान्भावयतानेन, ते देवा भावयन्तु वः ।**
**परस्परं भावयन्तः, श्रेयः परमवाप्स्यथ ॥ गीता ॥**

इत्थं वेदेषु उपनिषत्सु पुराणेषु नैकेषु ग्रन्थेषु यज्ञेन पर्यावरणरक्षा, प्रदूषणनिवारणं, प्राकृतिकतत्त्वानां विवेकपूर्णः उपयोगः यज्ञद्वारा आध्यात्मिकी मानसिकी च उर्ध्वगतिः इत्यादयः चिन्तनानि उपदिष्टानि सन्ति।

( क्रमशः )

## मासवार्ता

### आरब्धः Diploma in Sanskrit Teaching अभ्यासक्रमः ।



संस्कृतमाध्यमेन संस्कृतं पाठयितुं शिक्षकानां प्रशिक्षणाय एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं Diploma in Sanskrit Teaching इति अभ्यासक्रमं सञ्चालयति । एतस्मिन् वर्षेऽपि सप्टेम्बरमासस्य ५ दिनाङ्के अभ्यासक्रमोऽयम् आरब्धः । २८ छात्राः अभ्यासक्रमेऽस्मिन् प्रवेशं स्वीकृतवन्तः । अभ्यासक्रमोऽयम् श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन सह संलग्नः वर्तते । जुनमासपर्यन्तं छात्राः संस्कृतशिक्षकप्रशिक्षणं स्वीकरिष्यन्ति । अत्र उल्लेखनीयं यत् इदानीं पर्यन्तं १९६ छात्राः अभ्यासक्रमेऽस्मिन् प्रशिक्षणं प्राप्तवन्तः ।

### सम्पन्नः संस्कृतगरबाकार्यक्रमः



एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं नवरात्र्यां संस्कृतगरबाकार्यक्रमस्य आयोजनं करोति । एतस्मिन् वर्षेऽपि सप्टेम्बरमासस्य २९ दिनाङ्के सम्पन्नः भव्यः संस्कृतगरबाकार्यक्रमः । संस्कृत-साहित्य-अकादमी, गान्धिनगरस्य सहयोगेन आयोजितेऽस्मिन् विशिष्टे कार्यक्रमे मातुः निराजनतः आरभ्य द्वितालगरबा त्रितालगरबा भाङ्गडा इत्यादिनी ५० गीतानि प्रस्तुतानि । श्रीधवलकुमारस्य मार्गदर्शने अर्चना पटेलः, भावना रावलः, पारुलव्यासः जतीनः जोशी च सवाद्यं सुमधुराणि गरबागीतानि अगायन् । प्रसङ्गेऽस्मिन् अतिथिरूपेण डॉ. गौराङ्गः गांधी (Urologist & Andologist, Gandhi Urocare) श्री कृतेशः पटेलः (Chartered Accountant) उपस्थितौ आस्ताम् । अत्र उल्लेखनीयं यत् संस्कृतप्रेमिणाम् उत्साहं दृष्ट्वा संस्कृतविद्याप्रतिष्ठानम् अमदावाद-संस्कृत-एकेडेमी इत्यनयोः संयुक्तोपक्रमेण ऑक्टोबरमासस्य ८ दिनाङ्के ओरियनपार्टिप्लोटस्थाने द्वितीयवारं संस्कृतगरबाकार्यक्रमस्य भव्यम् आयोजनम् अभवत् । उभयोः अपि कार्यक्रमयोः त्रिसहस्राधिकाः संस्कृतप्रेमिणः भागम् अवहन् । संस्कृतप्रचारस्य कृते आयोजितोऽयं कार्यक्रमो सफलः ।

## कृपया हसन्तु

**रमणः - (नमनं प्रति) एतत् चायं दार्जलिङ्गतः आगतम् अस्ति ।**

**नमनः - अहो ! आश्चर्यम् !! इदानीमपि उष्णम् अस्ति ।**

★ ★ ★ ★ ★

**नमनः कमपि ज्योतिषाचार्यम् उपगम्य स्वस्य हस्तं प्रादर्शयत् । नमनस्य हस्तं दृष्ट्वा ज्योतिषाचार्यः अवदत्- "अद्य तव पत्न्याः धनलाभो भविष्यति ।" एतत् श्रुत्वा नमनः दुःखेन अवदत् - "आम्, सत्यं कथयति भवान् । अद्य अहं मम धनकोशं गृहे एव विस्मृतवान् ।"**

★ ★ ★ ★ ★

**नमनः - (न्यायाधीशं प्रति) यदि बाल्यावस्थायां मातुः कथनम् अश्रोष्यं तर्हि अद्य मम एतादृशी स्थितिः न अभिष्यत् ।**

**न्यायाधीशः - किं कथयति स्म तव माता ?**

**नमनः - यदा कथनमेव न श्रुतं तर्हि कथं वदेयं यत् माता किं कथयति स्म ।**

## अहो चातुर्यम्

**- संस्कृतविकिपिडीयाजालस्थानात्**

**मित्रास्मिन् नगरे महान् कथय कः तालद्रुमाणां गणः को दाता रजको ददाति वसनं प्रातर्गृहीत्वा निशि ।**
**को दक्षः परवित्तदारहरणे सर्वेऽपि दक्षाः स्वयम् कस्माज्जीवसि हे सखे विषकृमिन्यायेन जीवाम्यहम् ॥**

कश्चन यात्रिकः कञ्चित् ग्रामं प्राप्य अपृच्छत् – 'मित्र ! अस्मिन् ग्रामे महान् कः अस्ति ?' ग्रामीणः अवदत् – 'महान्तः अत्र बहवः । तालद्रुमाणां गणः एव अस्ति । तत्रत्याः सर्वे वृक्षाः महान्तः (उन्नताः) एव' इति । 'दाता कः अस्ति ?' – यात्रिकः अपृच्छत् । 'रजकः । सः प्रातः वस्त्रं नीत्वा सायं ददाति' इति अवदत् ग्रामीणः । 'अत्र दक्षः कः ?' – यात्रिकः अपृच्छत् । 'अन्येषां धनस्य पत्न्याः च हरणे सर्वे अपि दक्षाः एव' – इति ग्रामीणः अवदत् । 'एतादृशे कुत्सिते ग्रामे कथं वासः क्रियते भवता ?' इति अपृच्छत् यात्रिकः । 'विषकृमिन्यायेन जीवामि । विषे स्थितः कृमिः आदौ कष्टम् अनुभवति चेदपि गच्छता कालेन अभ्यस्तविषवासः सः तत्रैव सुखेन जीवति । तद्वद् अहम् अपि जीवामि' इति विषादेन उक्तवान् ग्रामीणः ।

**टीका विरुद्धा मूलस्य गौरवं वहति प्रथाम् ।**
**स टीकार्थो यदि पृथक् ग्रन्थे कर्षति नो दृशम् ॥**

केनचित् शास्त्रकारेण यः मूलग्रन्थः लिख्येत तं विरुध्य यदि कश्चित् टीकां लिखेत् तर्हि सः महतीं प्रसिद्धिम् आप्नुयात् । सः एव मूलकारस्य आशयं विवृण्वन् महाकारकं टीकाग्रन्थं यदि लिखेत् तर्हि अपि सः प्रसिद्धिं न प्राप्नुयात् । अल्पः अपि विरोधः प्रसिद्धये स्यात् । महान् अपि समर्थनप्रयासः अनादराय स्यात् । एषो हि लोकः !!

## ज्ञानसरिता

**अपूर्वः आश्रयः** – घोरायां मरुभूमौ तीक्ष्णातपात् रक्षणं प्राप्तुं कः उपायः उत्तमः स्यात् इति चिन्तयन्ति भवन्तः ? प्रायः अनुकूलवातप्रकोष्ठे वासः इति खलु वदेयुः भवन्तः ? किन्तु भारद्वाजपक्षी तु अन्यमेव उपायम् आश्रयति, यञ्च भवन्तः ऊहितुमपि न शक्नुयुः ।

तीक्ष्णातपात् आत्मनः रक्षणाय तेन अनुस्त्रियमाणः मार्गः नितराम् अपूर्वः । मध्याह्नकाले सः इजिप्षियन्गोधिकायाः च्छायाम् आश्रयति । एतत्स्थलं सुखदायकं निरपायञ्च इति सः जानाति । यतः आश्रयदात्री गोधिका भवति शाकाहारा । कौतुक नाम, स्वस्य आश्रयभूतं प्रदेशं प्रति स्वजातीयस्य अन्यस्य पक्षिणः आगमनाय अवकाशं न कल्पयति अयं पक्षी । यद्यपि तत्र द्वित्रैः पक्षिभिः आश्रयः प्राप्तुं शक्यः, तथापि स तु अन्यस्य उपस्थितं न सहते ।

**सिक्थवर्तिकायाः वैशिष्ट्यम्** – एषु दिनेषु सिक्थवर्तिकाः विविधाकारिकाः भवन्ति, विविधवर्णीयाः चापि । विविधेषु मङ्गलप्रसङ्गेषु, सन्तोषावसरे च तासाम् उपयोगः क्रियते बहुधा । अन्धकारे सिक्थवर्तिका एव प्रकाशस्य आधारः बहुत्र । सिक्थवर्तिका यदा ज्वाल्यते तदा धूमादिकं न निर्गच्छति । एवं तर्हि सिक्थं कथम् अदृश्यतां गच्छति ? क्व च याति तत् ? एतस्य उत्तरं प्राप्तव्यं चेत् अस्माभिः सिक्थस्य स्वरूपम् अवगन्तव्यम् । अङ्गाराम्लजलजनकयोः मिश्रणम् एव सिक्थं नाम । यदा सिक्थवर्तिका ज्वाल्यते तदा सिक्थस्थः अङ्गाराम्लांशः वायुस्थेन आम्लजनकेन मिश्रितः सन् कार्बन्डायोक्सैड्रूपं प्राप्नोति । जलजनकंच आम्लजनकेन मिश्रितं सत् बाष्परूपतां याति । एतस्याः उभयविधायाः रासायनिकप्रक्रियायाः कारणतः सिक्थस्य दाहे जाते अपि धूमादीनाम् उद्भवः न भवति ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **सत्वरम्** | शीघ्र | quickly |
| **सदनम्** | घर | house |
| **सन्तप्त** | तपाया हुआ | heated |
| **सन्तर्पणम्** | सन्तुष्ट करना | satisfying |
| **सन्तापः** | गर्मी | heat |
| **सन्तोषः** | परितुष्टि | satisfaction |
| **सन्दिग्धः** | सन्देहात्मक | doubtful |
| **सन्दीपन** | प्रज्वलित करने वाला | kindling |
| **सन्धानम्** | मेल | joining |
| **सन्धुक्षणम्** | प्रज्वलित करना | inflaming |
| **सन्नद्धः** | तैयार | ready |
| **सन्नहनम्** | तैयार होना | preparing |
| **सन्निकर्षः** | निकटता | nearness |
| **सन्निपातः** | नीचे गिरना | falling down |
| **सन्निभः** | समान | similar |

## किं भवन्तः जानन्ति ?

**१ ) यज्ञादि नियमानां ज्ञानाय ये ग्रन्थाः लिखिताः ते के ?**

(क) वेदाः (ख) कल्पसूत्रम् (ग) उपनिषद् (घ) आरण्यकः

**२ ) एतेषु कस्मिन् ग्रन्थे यज्ञवेदिकानिर्माणस्य नियमाः उक्ताः सन्ति ?**

(क) ब्राह्मण (ख) उपनिषद् (ग) शुल्बसूत्र (घ) आरण्यक

**३ ) एतेषु कः काव्यग्रन्थः श्रीहर्षेण रचितः नास्ति ?**

(क) विजयप्रशस्तिः (ख) नैषधीयचरितम् (ग) दशरुपकम् (घ) शिवशक्तिसिद्धिः

**४ ) एतेषु कः ग्रन्थः आदिशङ्कराचार्येण लिखितः नास्ति ?**

(क) भजगोविन्दम् (ख) विवेकचूडामणिः (ग) पञ्चीकरणम् (घ) चण्डीशतकम्

**५ ) एतेषु कः काव्यग्रन्थः जगन्नाथेन रचितः नास्ति ?**

(क) गङ्गालहरी (ख) सौन्दर्यलहरी (ग) करुणालहरी (घ) अमृतलहरी

**६ ) पञ्चतन्त्रस्य रचयिता कः अस्ति ?**

(क) नारायणपण्डितः (ख) विष्णुशर्मा (ग) कालिदासः (घ) अश्वघोषः

**७ ) हितोपदेशस्य रचयिता कः वर्तते ?**

(क) विष्णुशर्मा (ख) नारायणपण्डितः (ग) बाणभट्टः (घ) दण्डी

उत्तराणि – (१) ख (२) ग (३) ग (४) घ (५) ख (६) ख (७) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## मार्गदर्शनम्
## ( व्याकरणम् )
## Class 9, 10

**Date :** 30/10/19 to 08/11/19
**Day :** Daily
**Time :** 8:00 am to 9:30 am
**Fees :** 2000/-

- **Venue :** Eklavya Sanskrit Academy
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

# Admission Open

**Do you want to learn Sanskrit ?**
**Here is a chance......**

**Participate in**
## Sanskrit Spoken
**Programme and learn Sanskrit**

**Date :** 11/11/19 to 12/02/20
**Day :** Mon-Wed-Fri
**Time :** 6.30pm to 8.00pm
**Fees :** 4000/-

- **Venue :** Eklavya Sanskrit Academy
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237


संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

वार्षिकं रू - 100
द्वैवार्षिकं रू - 175
त्रैवार्षिकं रू - 250
अङ्कमूल्यं रू - 10


**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥


**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006